# Matrikachakravivekah

# માતૃકાચક્રવિવેકઃ

## Document Information

Text title : Matrikachakravivekah

File name : mAtRRikAchakravivekaH.itx

Category : devii, devI, tantra, mantra

Location : doc_devii

Author : svatantrAnandanAtha

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : January 18, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 19, 2026

*sanskritdocuments.org*

# માતૃકાચક્રવિવેકઃ

॥ ૐ શ્રીગણેશાય નમઃ ॥

॥ ૐ ગું ગુરુભ્યો નમઃ ॥

॥ માતૃકાચક્રવિવેકઃ ॥

(સ્વતન્ત્રાનન્દનાથવિરચિતઃ)

## પ્રથમઃ ખણ્ડઃ । તાત્પર્યવિવેકઃ

જાગ્રત્સુષુપ્તિકૃતદક્ષિણવામભાગાં
સ્વપ્નસ્વભાવપરિક્લૃપ્તજઘન્યભાગામ્ ।
તુર્યાતિતુર્યઘટિતાનનહૃત્પ્રદેશાં
પ્રાણેશ્વરીં પરશિવસ્ય પરામૃશામઃ ॥ ૧॥

સ્પર્શસ્વરોલ્લિખિતજાગરસુપ્ત્યવસ્થા-
મન્તઃસ્થસૂચિતસુષુપ્ત્યુદિત પ્રબોધામ્ ।
ઊષ્મોક્તજાગરદશોદિતસુપ્ત્યવસ્થાં
મન્ત્રોત્કરસ્ય જનનીં મનસા વિશામઃ ॥ ૨॥

સઙ્કોચસંશ્રયણવર્જનભાવભઙ્ગ્યા
જાગ્રત્સુષુપ્તિદશયોર્ગમકૌ પ્રયત્નૌ ।
દ્વૌ સ્પૃષ્ટતાવિવૃતતે વિદિતૌ સુધીભિઃ
સ્પર્શસ્વરાક્ષરગતૌ પરિશીલયામઃ ॥ ૩॥

સ્પૃષ્ટિર્યવર્ગવિષયા વિવૃતત્વયુક્તા
સ્પૃષ્ટ્યન્વિતા વિવૃતતા ચ શવર્ગનિષ્ઠા ।
તૌ સ્વપ્નતુર્યદશયોર્ગમકૌ પ્રયત્ના-
વેતૌ સ્મરામ્યસકલાપરિપૂર્તિપૂર્ત્યોઃ ॥ ૪॥

પૂર્ણૈવ પૂર્તિરવિકલ્પપદે સુષુપ્તૌ

જાગ્રત્યપૂર્તિરપિ સંસૃતિધામ્નિ તદ્વત્ ।
જાગ્રત્સુષુપ્તિસમવાયપદે તુરીયે
સ્વપ્ને ચ તાદૃશિ તયોરસમગ્રતૈવ ॥ ૫॥

સ્વપ્નઃ સુષુપ્ત્યનુગતં નનુ જાગ્રદેવ
તુર્યં ચ જાગ્રદનુવૃત્તસુષુપ્તિરેવ ।
સ્વપ્નસ્તથા ચ સતિ જાગ્રત એવ ભેદ-
સ્તુર્યા દશાપિ ચ તથૈવ સુષુપ્તિભેદઃ ॥ ૬॥

જ્ઞાનાત્મનાન્તરુદિતે ખલુ બોધસુપ્તિ-
સ્વપ્નસ્તુરીયમિતિ નામવિશેષભાજૌ ।
બાહ્યે ક્રિયાત્મકતયોદિતયોસ્તયોઃ સ્યા-
દાખ્યા પ્રબોધ ઇતિ સુપ્તિરિતિ પ્રસિદ્ધા ॥ ૭॥

જાગ્રદ્બહિર્વિલસનં નનુ ભેદસૃષ્ટેઃ
સ્વપ્નોન્તરુલ્લસનમિત્યુભયી દશૈવ ।
તુર્યાભિધાનમુપયાત્યવિભેદસૃષ્ટૌ
સૃષ્ટિદ્વયસ્ય જનિવિશ્રમભૂસ્સુષુપ્તિઃ ॥ ૮॥

સૃષ્ટા બહિઃ શિવચિતા પ્રકૃતિર્વિસર્ગ-
સ્તાં સ્વાત્મના કવલયન્ શિવ એષ બિન્દુઃ ।
સંસારવિશ્રમજુષોરિતિ નામધેયે
સંસારિણૌ પશુશિવૌ ચ પશુઃ શિવશ્ચ ॥ ૯॥

દ્વૈતાત્મકં ભવતિ સંસરણં પશોસ્ત-
દદ્વૈતરૂપમભવસ્ય પરસ્ય શમ્ભોઃ ।
મિશ્રં ત્રિરૂપમપિ સંસરણં યતઃ સ્યા-
દ્વિશ્રાન્તિભાક્તદિહ ધામ પરં હિ બિન્દુઃ ॥ ૧૦॥

ગૌણો હિ બિન્દુરિતિ વિત્તિરભેદરૂપા
શૈવી તનૂર્ભવતિ ભેદપદં તુ વેદ્યમ્ ।
જીવસ્ય સંવરકમસ્ય તતઃ સ્વરૂપં
સર્ગૈર્ભવેદ્વ્યવહૃતિર્મહતામિતીયમ્ ॥ ૧૧॥

ચૈત્યં વિમર્શપરિણામદશાવિમર્શ-
શ્ચિદ્ધર્મ એષ ચ ચિતો જનનાલ્લયાચ્ચ ।
નાસ્ત્યેવ સા ચિદપિ યદ્યવિમૃષ્ટરૂપા

ધર્મસ્તતો ભવતિ ચિચ્ચ વિમર્શશક્તેઃ ॥ ૧૨॥

ચિચ્ચૈત્યયોરિતિ સમે સતિ ધર્મધર્મિ-
ભાવે પરસ્પરપદાક્રમણં સ્વભાવઃ ।
ચૈત્યાવૃતા ભવતિ ચિત્પશુરેષ ચૈત્ય-
માવૃણ્વતી ચિદપિ યાતિ શિવપ્રસિદ્ધિમ્ ॥ ૧૩॥

ચિચ્ચૈત્યયોઃ સમતયા સ્તિમિતે સ્વભાવે
મિશ્રં તુ મધ્યમપદં પરશમ્ભુરૂપમ્ ।
ચિચ્ચૈત્યમિશ્રણતયા તદયં ત્રિરૂપો
ધર્મી ચ તત્તદુચિતશ્ચ તથા વિમર્શઃ ॥ ૧૪॥

ચિત્તિશ્ચ ચૈત્યમપિ તચ્ચ વિમર્શતત્ત્વં
જ્ઞાનક્રિયે ન હિ તયોઃ પરમાર્થભેદઃ ।
જ્ઞાનં ગૃહીતકઠિનત્વગુણં ક્રિયા સ્યા-
જ્જ્ઞાનં ભવેદ્વિરલિમાશ્રયિણી ક્રિયૈવ ॥ ૧૫॥

જ્ઞાનસ્ય સિધ્યતિ વિના ક્રિયયા ન રૂપં
તસ્યાસ્તથૈવ ન હિ તેન વિનોપલમ્ભઃ ।
તસ્માત્તયોર્યમલતૈવ મતં હિ સૈદ્ધં
પૂર્વાપરત્વકલનં ત્વિહ પૂર્વપક્ષઃ ॥ ૧૬॥

અર્ધં ક્રિયા ભવતિ દક્ષિણમન્યદર્ધં
જ્ઞાનં સમત્વમનયોરપિ મધ્યમિચ્છા ।
ઇચ્છૈવ બીજમચલાન્તરબાહ્યગત્યા
જ્ઞાનં ક્રિયા ચ ખલુ મૂલમિહાઙ્કુરશ્ચ ॥ ૧૭॥

જ્ઞાનં ક્રિયા તદુભયૈકરસાપિ ચેચ્છા
તત્ત્વત્રયં ભવતિ નિત્યયુતસ્વભાવમ્ ।
જ્ઞાનસ્ય માનમિતિ મેયમિતિ ક્રિયાયા
માતેતિ ચેતરપદસ્ય હિ નામભેદાઃ ॥ ૧૮॥

જ્ઞાનં ચ કર્મ ચ પરસ્પરમૂલમિચ્છા
મૂલં તયોસ્તદુભયં ખલુ મૂલમસ્યાઃ ।
મૂર્તિત્રયં મતમિદં ત્રયમેવ સૃષ્ટિ-
સ્થિત્યન્તકારણતયા ત્રિગુણસ્વભાવમ્ ॥ ૧૯॥

એતત્ત્રયાત્મકતયા સકલં ત્રિરૂપં
સુપ્ત્યાદિકા અપિ દશાશ્ચ તથૈવ તિસ્રઃ ।
સુપ્તિઃ ક્રિયાજડતયા ભવતિ પ્રબન્ધો
જ્ઞાનં વિમિશ્રમનયોઃ પદમન્યદિચ્છા ॥ ૨૦॥

અન્યોન્યલીનવપુષોરિહ ચૈત્યચિત્યોઃ
સુપ્ત્યાદિષુ ત્રિષુ પદેષુ ભવો દ્વિરૂપઃ ।
શ્લિષ્ટઃ પ્રવૃત્તિવિનિવૃત્તિમયો વિભાવ્યઃ
શ્રીચક્રમૂલમનુસંસ્થિતિદર્શનેન ॥ ૨૧॥

ઇચ્છા સુષુપ્તિરબહિર્જનિતઃ પ્રબોધો
જ્ઞાનં ક્રિયા ભવતિ જાગરણં જડસ્ય ।
તુર્યસ્થજાગરપદાદિસુષુપ્તિસીમા
ઇચ્છાદયઃ ખલુ દશાસ્ત્વજડાઃ શિવસ્ય ॥ ૨૨॥

અન્તર્મુખી ભવતિ બિન્દુગતિર્વિસર્ગ-
સ્યોક્તા ગતિર્ગુરુજનેન બહિર્મુખીતિ ।
પૂર્વઃ સુષુપ્તિપદમધ્યમુપૈતિ જાગ્રન્
મધ્યાત્તમૃચ્છતિ પરસ્તુ સુષુપ્તિમધ્યાત્ ॥ ૨૩॥

સુપ્ત્યાદિ જાગ્રદવધિ ત્રિતયં દશાનાં
જન્તોઃ પ્રવૃત્તિવપુષોઽથ નિવૃત્તિમૂર્તેઃ ।
તજ્જાગ્રદાદ્યવધિભૂતસુષુપ્તિ શમ્ભો-
રારોહસીમસમુપક્રમણોવરોહઃ ॥ ૨૪॥

તસ્માત્પ્રવૃત્તિવિનિવૃત્તિમયોભયાર્થઃ
સ્વપ્નઃ સુષુપ્તિરપિ જાગ્રદપીતિ ગોપ્યમ્ ।
ભેદાનિ ભેદમયજીવશિવાઙ્ગકાનાં
ષણ્ણાં વિમિશ્રણમિદં પ્રકૃત્તિર્દશાનામ્ ॥ ૨૫॥

સ્વપ્નપ્રજાગરસુષુપ્તિમયાષ્ટકોણ-
પઙ્ક્ત્યસ્રયુગ્મમનુકોણવિરાજમાને ।
યન્ત્રેશ્વરે હિ શિવજીવસમન્વયોઽયં
દૃષ્ટઃ સમસ્તપરમાર્થવિદીષ્ટદેવે ॥ ૨૬॥

સુપ્તિઃ શશી જડતયા તપનોઽપિ જાગ્ર-
ચ્ચૈત્યસ્ય સન્તપનમાત્રચિદાત્મકત્વાત્ ।

સ્વપ્નોનલોગિલિતચૈત્યતયા પશુત્વે
સોઽપ્યર્ક એવ દહનઃ સકલં શિવત્વે ॥ ૨૭॥

ચૈત્યાતિવિસ્ફુરણસીમ્નિ ખલુ પ્રતિષ્ઠા
જાગ્રત્યણોરથ તુરીયપદાન્તરર્થે ।
શમ્ભોર્વિમર્શવતિ જાડ્યમલવ્યપેતે
જાગ્રત્સુષુપ્તિદશયોઃ સમમધ્યભાગે ॥ ૨૮॥

માતા શશી ભવતિ મેયપદં પશુત્વે
વહ્નિઃ પ્રમાણમિહ તિગ્મરુચિઃ ક્રિયાગ્ર્યમ્ ।
માતાનલઃ શિવપદે હિમગુઃ પ્રમેયં
જ્ઞાનાગ્ર્યભાગ ઇહ તુર્યરવિઃ પ્રમાણમ્ ॥ ૨૯॥

ચૈત્યપ્રમાતુરિહ યજ્જડમેવ માનં
તચ્ચિત્પ્રમાણમનુજીવતિ તદ્ધિ ચૈત્યમ્ ।
ચિત્તત્ત્વમેવ નિયમાદનુજીવદેતન્-
નાત્યશ્નુતે સ્વમિવ ચિત્તદિદં વિભેદિ ॥ ૩૦॥

જાડ્યાદચિન્ન વિમૃશત્યપિ માતૃભાવે
તાં ચિત્કલેવ ગિલિતાત્મપદાં મૃશન્તિ ।
મોહેન કલ્પયતિ માતૃદશામમુષ્યા
વ્યાપ્તિર્હિ માતૃપદલક્ષણતોપપન્ના ॥ ૩૧॥

માનં તૃતીયપદભાગપિ બાહ્યતસ્તુ
મધ્યે વિમિશ્રણમિદં ખલુ મેયમાત્રોઃ ।
મિશ્રં હિ મધ્યમપદે નિખિલસ્ય દૃષ્ટં
દ્વૈરુપ્યમસ્ય ચ નપુંસકતા ચ ધામ્નઃ ॥ ૩૨॥

રશ્મીનનૂદયતિ બિમ્બમતઃ સ્વરેષુ
સર્ગઃ સિતાંશુરણુબિન્દુરિનશ્ચ કાદૌ ।
યાદૌ શિખી મહિતબિન્દુરિતિ ત્રિખણ્ડ્યા
વર્ણક્રમેણ વિદિતં ત્રિમહોમયત્વમ્ ॥ ૩૩॥

ખણ્ડક્રમેણ શશિનો દહનાઙ્ગતોક્તા
તદ્વ્યુત્ક્રમેણ જડભાનુગુણત્વમગ્નેઃ ।
ખણ્ડેષુચ ક્રમવિલોમજપેન ચૈત્ય-
ચિત્યોઃ પરસ્પરપદાક્રમરીતિરુક્તા ॥ ૩૪॥

સ્વપ્નશ્ચ જાગ્રદપિ વાસરપૂર્વયામૌ
તુર્યં પદદ્વયવદુત્તરયામયુગ્મમ્ ।
સુપ્તિસ્તુરીયલયભૂઃ પ્રથમં ક્ષપાર્ધં
સ્વપ્નપ્રજાગરદશાલયભૂર્દ્વિતીયમ્ ॥ ૩૫॥

ઇતિ શ્રીમાતૃકાચક્રવિવેકે તાત્પર્યવિવેકઃ પ્રથમઃ ખણ્ડઃ ॥ ૧॥

## દ્વિતીયઃ ખણ્ડઃ । સુષુપ્તિવિવેકઃ

માયાબલાત્પ્રથમભાસિ જડસ્વભાવં
વિદ્યોદયાદથ વિકસ્વરચિન્મયત્વમ્ ।
સુપ્ત્યાહ્વયં કિમપિ વિશ્રમણં વિભાતિ
ચિત્રક્રમં ચિદચિદેકરસસ્વભાવમ્ ॥ ૧॥

માતા નભઃક્ષિતિવિમિશ્રપદં પ્રમાણં
વાયુઃ શિખી ચ સલિલં ચ મહી ચ મેયમ્ ।
જ્ઞાનાત્મપૂર્વપઠિતં યુગલત્રયેઽપિ
પશ્ચાદુદીરિતમિહાભિમતં ક્રિયાત્મ ॥ ૨॥

વર્ણાઃ સ્વવાયુશિખિતોયધરાઃ ક્રમેણ
સ્યુઃ કણ્ઠતાલુકશિરોરદનોષ્ઠજાતાઃ ।
સ્થાનોચ્ચયાપચયજૌ મહદલ્પભાવૌ
સ્યાદ્વ્યુત્ક્રમઃ પશુપદે સલિલાનિલાદૌ ॥ ૩॥

ઇચ્છાદ્વયં ભવતિ તાલુભવોષ્ઠ્યવર્ણૌ
મૂર્ધન્યદન્ત્યતનુમાનયુગં ક્રિયાદિ ।
સઙ્કોચભાવતદભાવવશાદકાર-
સર્ગોઽપિ બિન્દુરપિ સઞ્શ્રિતમાતૃભાવઃ ॥ ૪॥

મૂલદ્વયે સ્ફુરતિ માતૃયમસ્તદન્ત-
રિચ્છાદ્વયં ભવતિ માનયુગં તદન્તઃ ।
એતત્સમં પદમતો વિષમં દ્વિરૂપં
ચૈત્યોચ્છ્રયે સ્ફુરતિ જાતુ ચિદુચ્છ્રયે ચ ॥ ૫॥

સામ્યં ભવેત્પ્રકૃતમત્ર ચમત્ક્રિયૈવ

વૈષમ્યમદ્ભુતતરા હિ વિમર્શવૃત્તિઃ ।
નિષ્પન્દતાં સમપદે સતતં ભજન્તિ
પ્રસ્પન્દતે ચ ચિદચિત્કલિતોચ્છ્રિતત્વાત્ ॥ ૬॥

ચૈત્યં યદોલ્લસતિ સઙ્ઘટિતસ્વકેચ્છં
ચિત્સ્વં સ્વભાવમણુમાશ્રયતે નિજેચ્છામ્ ।
અન્તર્ભવેદથ ચિદુલ્લસને તુ ચેત્યં
પઞ્ચાઙ્ગકં જડપદં ચતુરઙ્ગમન્યત્ ॥ ૭॥

અન્તર્બહિઃ કરણજૃમ્ભણયોરદીર્ઘ-
દીર્ઘસ્વરેષુ જડસંસરણં દ્વિરૂપમ્ ।
એ ઐ ઇતિ દ્વયમિહોલ્લિખતિ ક્રમેણ
સ્વીયેચ્છયા પદયુગે ઘટનં જડસ્ય ॥ ૮॥

અન્તર્બહિઃ કરણવૃત્તિવશાદદીર્ઘ-
દીર્ઘં સ્વરેષ્વજડસંસરણં દ્વિરૂપમ્ ।
ઓ ઔ ઇતિ દ્વયમિહોલ્લિખતિ ક્રમેણ
સ્વીયેચ્છયા દ્વિરજડસ્ય પદસ્ય યોગમ્ ॥ ૯॥

ભેદેઽપિ બિન્દુરવિભેદપદેવિસર્ગો
જ્ઞાનક્રિયાસ્થલા તયાઽઽન્તરબાહ્યસીમ્નોઃ ।
દૃષ્ટાવિહ પ્રકરણસ્ય બલાત્સ્વભાવં
નૈવાપ્નુતઃ સ્ફુટમભેદવિભેદરૂપમ્ ॥ ૧૦॥

બિન્દુઃ કલા અપિ વિસર્ગકલા ગુણાઃ સ્યુઃ
સર્ગઃ કલા અપિ ચ બિન્દુકલાઙ્ગભૂતાઃ ।
બિન્દ્વગ્નિરષ્ટકલૈવ વિસર્ગપાયી
સર્ગસ્તુ ષોડશકલાવૃતબિન્દુરિન્દુઃ ॥ ૧૧॥

બિન્દોઃ કલા અપિ વિસર્ગકલાશ્ચ સપ્ત
સપ્તૈતદન્વયવશેન ચતુર્દશારમ્ ।
બિન્દ્વગ્નિરષ્ટદલપદ્મગતસ્તદન્તઃ
સર્ગશ્ચ ષોડશદલાબ્જગતોઽસ્ય ચાન્તઃ ॥ ૧૨॥

હ્રસ્વસ્વરાષ્ટદલભાગનલો હિ દીર્ઘ-
માત્રાત્મષોડશદલામ્બુજભાક્છશાઙ્કઃ ।
ચન્દ્રાર્કયોસ્ત્રિગુણિતાઽષ્ટકલાત્મનોઃ સ્યા-

દ્વિન્દૌ પ્લુતાષ્ટકદલાત્મનિયુક્તિરગ્નૌ ॥ ૧૩॥

ઇતિ માતૃકાચક્રવિવેકે સુષુપ્તિવિવેકો દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

## તૃતીયઃ ખણ્ડઃ । સ્વપ્નવિવેકઃ

વિશ્વસ્ય કારણદશેતિ વિચારિતૈવં
કાર્યક્રમો ભવતિ કાર્યમિદં વિમર્શાત્ ।
વિશ્રાન્તમાત્મનિ પરાહ્વયવાચિ સુપ્તૌ
વિશ્વં વમત્યથ વિબોધપદે વિમર્શઃ ॥ ૧॥

વાણી પરા ખલુ ૠકારલ્રકારરૂપા
સઙ્કોચગન્ધસહિતા ગગનેઽપિ સુપ્તૌ ।
સઙ્કોચ એવ ચિદચિદ્ગગનસ્ય વાણી
તદ્વ્યોમ સઙ્કુચતિ ચ પ્રકૃતૌ વિમર્શે ॥ ૨॥

ધર્મે સ્વકે સ્વરસવાહિનિ વાક્સ્વરૂપે
લગ્નં પરં ગગનમપ્યુપયાતિ સત્તામ્ ।
સત્ત્વાય નિત્યમુપગૂઢાવિમર્શતત્ત્વં
તદ્ધર્મતાં ગગનમપ્યુપયાતિ ચિત્રમ્ ॥ ૩॥

તસ્માત્પરૈવ જનની સમુપાસનીયા
વ્યોમ્નઃ પરસ્ય ગતજાડ્યમિયં હિરૂપમ્ ।
બધ્નાતિ ચેયમિદમંશસમુચ્છ્રયેણ
જન્તૂન્ વિમોચયતિ ચોન્નમિતાઽહમંશાત્ ॥ ૪॥

ત્રેધેદમિત્યહમિતિ સ્ફુરણાત્મિકાયા-
સ્તસ્યાઃ સ્વરૂપમુભયાંશસમાઽસમત્વે ।
તદ્ધર્મસઙ્ગતિવશેન તથા ત્રિરૂપો
ધર્મી ચ ચૈત્યચિતિમેલનસિદ્ધરૂપઃ ॥ ૫॥

વિશ્રાન્તિધામનિ નિજાશ્રયયોર્વિમર્શ-
શ્ચિચ્ચૈત્યયોર્ભવપદે સ્વયમાશ્રયોઽપિ ।
એતદ્દ્વયં નિજસમાશ્રયમેવ કુર્વન્
સ્વૈરક્રમેણ વિલસત્યબહિર્બહિશ્ચ ॥ ૬॥

સ્વપ્ને સ્ફુરત્યબહિરિન્દ્રિયમૂર્તિરન્ત-

બાહ્યે બહિઃકરણમૂર્તિરથ પ્રબોધે ।
સઙ્કોચમાશ્રયતિ પૂર્વપદેઽત્ર કિઞ્ચિ-
દત્યર્થમુત્તરપદે તુ તમાદધાતિ ॥ ૭॥

સઙ્કોચવર્ત્તિપરસીમનિ બાહ્યરઙ્ગે
વ્યાપ્તિં સમર્પયતિ નાન્તરધામ્નિ પૂર્ણે ।
વિશ્રાન્તિમર્પયતિ પૂર્ણતરામિતોઽપિ
માયા ચમત્કૃતિમવાપ્ય જડો વિમર્શઃ ॥ ૮॥

ઇચ્છાદ્વયાન્તરિતમાનયુગે યવર્ગે
સ્વાપ્ને જડા ખલુ દશા સમવેક્ષણીયા ।
માતૃત્વમત્ર મનસો હિ લકારમૂર્તેઃ
સ્વપ્નો હિ માનસિકસંસરણં પ્રસિદ્ધમ્ ॥ ૯॥

સ્વસ્યૈવ શક્તિરવમર્શમયી સ્વગર્ભે
ગ્રસ્તસ્તયૈવ મનસા વપુરાદિમૂર્ત્યા ।
આત્માસ્વરશ્મિપટલસ્થગિતોઽર્થમેવ
નાભાતિ કિઞ્ચિદપિ કઞ્ચુકપઞ્ચકાન્તઃ ॥ ૧૦॥

આત્માન્વિતં વપુરહઙ્કૃતિ ધીમનાંસિ
ત્રીણ્યાન્તરાણિ કરણાનિ પદં પ્રમાતુઃ ।
એતન્મનોવિલસિતં યદિ પઞ્ચરૂપં
માયાપદં પદમિદં પ્રકૃતેસ્તુ સાક્ષાત્ ॥ ૧૧॥

માયાપદે સ્વમન એવ શરીરતાભા-
ગિત્યાદિશન્ત્યણુવિદોઽત્ર વકારગર્ભે ।
તદ્બાહ્યતોઽપિ ચ લકારમનુસ્મરન્તઃ
પઞ્ચાઙ્ગકં પદમિદં ચતુરઙ્ગમેવ ॥ ૧૨॥

પૃથ્વી લકાર ઇહ દેહમયી સ્વધામા
કર્તૃજ્ઞતેસ્ય મરુદગ્નિમયૌ યરેફૌ ।
વ્યાપ્યૈતયોઃ ક્ષિતિજલૌ વિકૃતે લવૌ ચ
સ્વાત્મસ્થિતસ્ય વપુષઃ કરણાનિ ગર્ભે ॥ ૧૩॥

મગ્નઃ પુમાન્વપુષિ ચિત્તમહઙ્ક્રિયાયાં
બુદ્ધૌ જડાંશજઠરેઽપ્યજડસ્તદંશઃ ।
ઇત્થં પ્રમાતરિ જડાંશગતાઽજડાંશે

જ્ઞાનક્રિયાન્તરવભાતિ મહાનજાણ્ડઃ ॥ ૧૪॥

પિણ્ડાણ્ડમૂલમપિ મૂલમિવાસ્ય ભાતિ
બ્રહ્માણ્ડમન્તરમપિ બાહ્યમિવાસ્ય ચિત્રમ્ ।
માયાવિમોહિતદૃશા તદણુર્નિરીક્ષ્ય
સ્વાઙ્ગાનિ પઞ્ચ કલયત્યણુશક્તિકાનિ ॥ ૧૫॥

સઙ્કુમવાયુશિખિભૂજલખાપકર્ષા
બન્ધાઃ સ્યુરન્તરણુકસ્ય કલાપ્યવિદ્યા ।
રાગશ્ચ કાલનિયતી ઇતિ કઞ્ચુકાસ્તે
માયાત્મનઃ પ્રથમકઞ્ચુકતા સુષુપ્તેઃ ॥ ૧૬॥

કર્તૃત્વશક્તિરનિલઃ સકલજ્ઞતાગ્નિ-
ર્ભૂઃ પૂર્ણતાઽવિલયતામ્બુ વિયદ્વિભુત્વમ્ ।
પઞ્ચાપિ શક્તય ઇમા વિતતાઃ સ્વરૂપં
શમ્ભોર્ભવન્ત્યપિ ચ સઙ્કુચિતાઃ પશોસ્તુ ॥ ૧૭॥

સ્યાત્પઞ્ચશક્તિમયતા પ્રકૃતિઃ શિવસ્ય
સ્વાન્તર્જગત્કલનમપ્યથ દેહિનસ્તુ ।
બાહ્યે જગત્કલનમેવ ભવેદ્વિભેદઃ
સ્વાભ્યન્તરસ્થજગતોઽપિ વિમોહશક્ત્યા ॥ ૧૮॥

અન્તઃસ્થિતસ્ય મનસો ન હિ પૂર્તિયોગ-
શ્ચૈત્યસ્ય તત્કબલિતત્વવિનિશ્ચયાયાઃ ।
તદ્વચ્ચિતેરપિ ન પૂર્તિરતો દશેયં
પક્ષદ્વયે સ્ફુરદપૂર્ત્યભિપૂર્તિયોગા ॥ ૧૯॥

અધ્વા ભવેચ્ચિદપકર્ષવશાદશુદ્ધઃ
શુદ્ધસ્ત્વસૌ (શુદ્ધસ્તનૌ)ભવતિ ચૈત્યપદાપકર્ષાત્ ।
ચિચ્ચૈત્યયોરુપચયાઽપચયાઽવિશેષાન્-
મિશ્રો હિ માયિકપદં ભવતીદમધ્વા ॥ ૨૦॥

આત્મા વકારવપુષાણુરુકાર એવ
દેહાત્મનૈવ ખલુ સંસૃતિરસ્ય જન્તોઃ ।
દેહં ચ તાત્ત્વિકમમુષ્ય સુષુપ્તમેવ
સ્વપ્ને તદત્ર મન એવ શરીરતાભાક્ ॥ ૨૧॥

ઇતિ માતૃકાચક્રવિવેકે સ્વપ્નવિવેકસ્તૃતીયઃ ખણ્ડઃ ॥ ૩॥

## ચતુર્થઃ ખણ્ડઃ । જાગ્રદ્વિવેકઃ

ઇત્યન્તરીષદિહ સઙ્કુચિતે વિમર્શે
સઙ્કોચમાશ્રયતિ બાહ્યપદે પ્રગાઢમ્ ।
પ્રત્યેકમેવ કલયન્ત્યથ ભાવમેવં
ભૂતાનિ પઞ્ચ જગતો નિયતઃ કલાપઃ ॥ ૧॥

યદ્વર્ણપઞ્ચકમપૂર્વકમાદિવર્ગ્ય-
મન્તઃસ્થતાં ભજતિ સઙ્કુચિતે તદીષત્ ।
તત્કાદિવર્ગતનુસઙ્કુચિતં નિતાન્ત-
મૂષ્માત્મકં ચ દધતેઽઙ્કુરિતાભિપૂર્તિ ॥ ૨॥

સ્થાનેન સાધિતધરાપ્રભૃતિસ્વભાવે
વર્ણોત્કરે ભવતિ માતૃપદં પવર્ગઃ ।
આત્મા મનસ્તદનુ બુદ્ધિરહઙ્ક્રિયા ચ ।
પ્રાક્ ચેતસઃ પ્રકૃતિરપ્યવરોહભઙ્ગ્યા ॥ ૩॥

શ્રોત્રાદિકં ખલુ તવર્ગમયં વિલોમા-
દ્વાગાદિ પઞ્ચકમિદં ચ ટવર્ગરૂપમ્ ।
શબ્દાદિ ખાદ્યપિ ચવર્ગકવર્ગરૂપ-
મેતાનિ વાયુદહનામ્બુમહીવિલાસાઃ ॥ ૪॥

દેહાત્મિકા પ્રકૃતિરાન્તરરૂપમુર્વ્યાઃ
સૂક્ષ્મં જલસ્ય ખલુ રૂપમહઙ્ક્રિયા સ્યાત્ ।
અગ્નેસ્તુ બુદ્ધિરનિલસ્ય મનોઽન્તરાત્મા
સર્ગઃ ખલુ પ્રકૃતિજઃ ક્ષિતિસર્ગબીજમ્ ॥ ૫॥

દેહાત્મનોઃ પ્રકૃતિપૂરુષયોઃ પ્રમાતા
દેહોત્ર તસ્ય નિલયોઽપિ તદઙ્ગમાત્મા ।
આત્મા યથા ભવતિ માતૃપદં વપુશ્ચેત્
તલ્લીનમસ્ત્યવિરહઃ શિવયોઃ સ્વભાવઃ ॥ ૬॥

જાડ્યાદહઙ્કૃતિરિતિ પ્રથતે વિમર્શો
બુદ્ધિર્જડાજડતયા મનસસ્ત્વજાડ્યાત્ ।

ત્રૈગુણ્યમેતદબહિઃ કરણત્રયં સ્યાત્
સૌષુપ્તજાગ્રદવશેષદશાનિદાનમ્ ॥ ૭॥

દેહી ગુણત્રયમયપ્રકૃતિર્દશાસુ
સુપ્ત્યાદિકાસુ નિયમાત્પરિબમ્ભ્રમીતિ ।
તાસ્વપ્યહઙ્કૃતિપુરઃસરણાત્ત્રિપુટ્યાં
મેયોન્નતિં કલયતિ પ્રમુખક્રિયાંશમ્ ॥ ૮॥

મેયાદિકા સતતયુક્ત્રિપુટી મનસ્તાં
મેયાદિ ભાસયતિ મૂઢમહઙ્ક્રિયાત્મ ।
માત્રાદિ ભાસયતિ ચાથ નિજસ્વભાવા-
દ્બુદ્ધિશ્ચ મધ્યમપદે મન એવ બોધ્યમ્ ॥ ૯॥

તસ્માત્પકારવપુષઃ પ્રકૃતેઃ પ્રમાતુ-
રાત્મા મકારવપુરન્તર એવ લીનઃ ।
તન્મધ્યતા(તઃ)સ્થિતિરહઙ્કૃતિધીહૃદાં સ્યા-
દેતત્પ્રમાતૃપદમિન્દ્રિયલગ્નવિશ્વમ્ ॥ ૧૦॥

એતચ્ચ માતૃપદમિન્દ્રિયસંશ્રિતં ચ
તત્સંશ્રયશ્ચ મન એવ તદિન્દ્રિયં સ્યાત્ ।
તદ્ગ્રામણીન્દ્રિયકુલસ્ય વિમર્શશક્તિ-
શ્ચિચ્ચેત્યમિશ્રમખિલં ખલુ તદ્વિલાસઃ ॥ ૧૧॥

સ્વપ્ને ચ જાગરણમાતૃપદે ચ વેદ્ય-
મિચ્છાત્મનો મનસ એવ વિભાતિ કુક્ષૌ ।
પૂર્વત્ર માતૃ મન એવ શરીરતાભાક્
પ્રત્યક્ષમુત્તરપદે તુ શરીરમેવ ॥ ૧૨॥

ચેતશ્ચમત્કૃતિપદં વમતિ સ્વલીનં
વિશ્વં બહિઃ શ્રુતિમુખેન્દ્રિયવર્ગભાવાત્ ।
તત્રાપિ ધીન્દ્રિયગણઃ પવનોઽપિ પૃથ્વી
જ્ઞેયૈર્જલૈરપિ મરુદ્ભિરુદીરિતોઽન્તઃ ॥ ૧૩॥

કર્મેન્દ્રિયાણિ કઠિનત્વપરાન્તભાઞ્જિ
વહ્ન્યાકૃતીનિ ખપદસ્થધરાશ્રિતાનિ ।
પૃથ્વીમયપ્રકૃતિખગ્રહણોન્મુખાનિ
બોધ્યાનિ ભૂતવિતતેરિહ વૈપરીત્યે ॥ ૧૪॥

માનાત્મકસ્ય તરણેર્દ્વયતો હિ સિદ્ધિઃ
માયાબલાત્પ્રથમતાત્ર ચ મેયકોટ્યાઃ ।
ગ્રાહ્યગ્રહીતૃપદવર્ણસમન્વયેન
યોજ્યાઃ કલા બહિરથાન્તરપિ ક્રમજ્ઞૈઃ ॥ ૧૫॥

માતા દશેન્દ્રિયમયોદશકં ચ મેયં
તન્મેલનાદ્દશકલાત્મદશારયુગ્મમ્ ।
અન્તઃ કલાદ્વયમિહ પ્રકૃતૌ નિલીન
સ્ત્રૈગુણ્યમાતરિ પુમાઁશ્ચતુરસ્રબિમ્બે ॥ ૧૬॥

માનાત્મનૈવ ચિદચિત્સ્થિતિરત્રચક્રે
ભેદાત્મકે ન ભવતીહ વિસર્ગબિન્દોઃ ।
મસ્યાનુષક્તિરપિ મુખ્યસમન્વયસ્ય
બિન્દ્વેકભોગપદમાતૃપુરોચિતસ્ય ॥ ૧૭॥

સ્વપ્ને સ્મૃતં તદનુ જાગ્રતિ સત્યકલ્પં
બન્ધં પ્રપદ્ય વપુષા સ્વવિમર્શશક્ત્યા ।
ક્ષિત્યા ચ તત્પરવશો હૃતમાતૃભાવો
મધ્યન્દિનદ્યુમણિરેષમકારબિન્દુઃ ॥ ૧૮॥

યત્પાદિવર્ગવમુખાર્ણચતુષ્ટયસ્ય
સઙ્કોચવર્જનમિદં ખલુતન્ત્રનીત્યા ।
તુર્યસ્થિતં હમુખશાન્તચતુષ્ટયાત્મ-
યોજ્યં ક્રમેણ બહિરન્તરભેદસૃષ્ટ્યોઃ ॥ ૧૯॥

ઇતિ શ્રીમાતૃકાચક્રવિવેક જાગ્રદ્વિવેકશ્ચતુર્થઃ ખણ્ડ ॥ ૪॥

## પઞ્ચમઃ ખણ્ડઃ । તુર્યવિવેકઃ

અક્ષેષુ વેદ્યવિલયઃ ખલુ શુદ્ધવિદ્યા
દેહે તદક્ષવિલયો ભવતીશ્વરત્વમ્ ।
ઈશો હિ વિશ્વમયદેહકૃતાભિમાનો
જાગ્રચ્છિવસ્ય પશુજાગરચક્રલગ્નમ્ ॥ ૧॥

યદ્વાહ્યબાહ્યપદમજ્જનમન્તરન્ત-

સ્તચ્ચિત્પદે જડપદે વિપરીતમેતત્ ।
અક્ષાત્મવેદ્યમિહ શઃ સ હિ શુદ્ધવિદ્યા
દેહાવિભિન્નકરણેન્દ્રિયમીશ્વરઃ ષઃ ॥ ૨॥

જ્ઞાનેન્દ્રિયં સ હિ સદાશિવ આત્મનૈક્યે
સ્વાત્મા ખવિશ્રમમયો હ ઇતીહ શક્તિઃ ।
એતત્તુરીયપદમઙ્ગચતુષ્ટયાઢ્યં
બાહ્યાન્તરાલપદયોઃ શ્રિતરૂપસામ્યમ્ ॥ ૩॥

એત્પદં પદમખણ્ડિતમેવ શુદ્ધ-
વિદ્યાદિકસ્ય ખલુ તત્ત્વચતુષ્ટયસ્ય ।
વેદ્યાદ્યુદઞ્ચિતચિતિસ્ફુરણક્રમેણ
તત્તદ્દશાવતરણં વિબુધૈર્વિભાવ્યમ્ ॥ ૪॥

સાદાશિવઃ સ ખલુ બિન્દુમયસ્તવર્ગ-
સ્તત્રેશ્વરાઙ્ગમયમાન્તરધામયોગ્યઃ ।
જ્ઞાનક્રિયે ન સુશિવસ્ય સદાશિવેશા-
વન્તર્બહિશ્ચ નિયતાઙ્ગિપદૌ ક્રમેણ ॥ ૫॥

ઇચ્છાપપઞ્ચકવબિન્દુમયી હશક્તિ-
ર્જ્ઞાનક્રિયાસમપદં ખલુ સોભયાત્મા ।
બિન્દૌ સમુન્મિષતિ સર્ગપદે ક્રમેણ
સંસૃષ્ટિરાપરિસમાપ્તિતયોર્વિભાવ્યા ॥ ૬॥

પુર્વત્ર નૈવહિ પરો નિયતઃ પરત્ર
પૂર્વો ભવેન્નિયત એવ શષાદિવૃન્દે ।
એકત્ર સંવિદુદયેઽપ્યપરત્ર ભાસ-
સ્તસ્યા ઇતીદમથવા સમમેવ બિન્દુઃ ॥ ૭॥

જાગ્રચ્છિવસ્ય પશુજાગરયુક્તદૈશ-
મન્તર્દશારમિહ કોણગતં બહુત્વમ્ ।
ભેદોદયોલ્લસિત મેતદભેદકોટ્યાં
પ્રાપ્નોતિ સઙ્ગ્રહામિતિ પ્રતિપદ્રહસ્યમ્ ॥ ૮॥

યઃ પાર્થિવે ચિદુદયઃ સ હિ શુદ્ધવિદ્યા
યઃ પ્રાકૃતે સ પુનરીશ્વરતા કિલાડણ્ડે ।
યો માયિકે સ તુ સદાશિવતેતિ શાદે

સ્ત્રૈરુપ્યધીરિહરહસ્યતમં ગુરૂણામ્ ॥ ૯॥

બિન્દૂદયે વિશતિ સર્ગ ઇમં તથૈવ
સર્ગોદયે તમથ સોઽપિ પદે તદન્તઃ ।
કઃસ્યાદ્ધકારહૃદિલશ્ચ વકારગર્ભે
બાહ્યે તુ ચિત્ પ્રકૃતિસર્ગમુખે વિભક્તા ॥ ૧૦॥

અન્તઃ પદં ભવતિ તચ્ચતુરઙ્ગમૈક્યા-
ચ્ચિચ્ચૈત્યયોઃ કરણસીમ્ન્યપિ ભાવિતૈક્યમ્ ।
પઞ્ચાઙ્ગકં ભવતિ બાહ્યપદં પ્રકૃત્યાં
ચિદ્વહ્નિગર્ભકુહરાદથ નિર્ગતાયામ્ ॥ ૧૧॥

જ્ઞાનક્રિયોન્મુખહકારમયાદ્વયેચ્છા-
વિશ્રાન્તિરન્તરબહિર્મુખવિશ્રમાત્મા ।
કૂટાક્ષરાત્મતનુરેષ શિવઃ સુષુપ્તિ-
વિશ્રાન્તિરેવ સવિકલ્પકલાલ્પગન્ધા ॥ ૧૨॥

નાસ્ત્યસ્તિ વેત્ત્યુદિતસંશયજાગ્રતીહ
સુપ્તૌ । । । । શિવે (ભવતિ)(જાગ્ર)જગદભેદરૂપમ્ ।
જ્ઞાનક્રિયાત્મકતયા પ્રતિરૂપભિન્ન-
મેવં ચતુર્વિધમધિશ્રિતબીજમાત્રમ્ ॥ ૧૩॥

જ્ઞાનં દ્વયાદ્વયમયં લસકારરૂપં
તાદૃક્ ચ કર્મ કષકારમયં વિદુસ્તત્ ।
શ્લિષ્ટં પુરઃ સ્ફુરિતસદ્વયકોટિ ળ ક્ષ-
(શ્લિષ્ટં પુરઃ સ્ફુરિત સદ્વયકોટિલક્ષ-)
રૂપં પરસ્પરગતં ચ સમં ચ કૂટમ્ ॥ ૧૪॥

જ્ઞાનાત્મજાગરસુષુપ્ત્યવધી મકાર-
કૂટાત્મકૌ પશુશિવૌ ગુણકોણબિન્દ્વોઃ ।
શ્લિષ્ટૌવશાદિચતુરસ્રયુગાન્વયોત્થ-
નાગાશ્રરશ્મ્યુદરગૌ નનુ સર્ગબિન્દૂ ॥ ૧૫॥

જ્ઞાનક્રિયાત્મકસુષુપ્તિવિબોધમધ્ય-
સંસ્થૌ ક્ષમાવુભયપક્ષગબિન્દુસર્ગૌ ।
સવ્યાપકૌ તદુભયસ્ય તદઙ્ગિભૂતૌ
જાગ્રત્સુષુપ્તિસમવાયપદેઽનુષક્તૌ ॥ ૧૬॥

સઙ્કોચપૂર્તિપરસીમપદોભયાર્થા
શ્રીચક્રમધ્યનિલયા ત્રિપુરેશ્વરી સા ।
ત્રેધા વિસર્ગપદમેકવિધં પદં ચ
બિન્દોસ્તુરીયમિતિ બાહુચતુષ્ટયાઢ્યા ॥ ૧૭॥

સૌષુપ્તજાગ્રદબહિઃ પદજાગરેષુ
તોયક્ષમાનિલમયેષ્વ કલાત્મશક્ત્યા ।
આત્તેચવર્ગયમયસ્વગુણેક્ષુચાપ-
પુષ્પેષુપાશનિગૃહીતચિતા ત્રિબાહુઃ ॥ ૧૮॥

તુર્યેઽગ્નિધામ્નિ હચિતા સસૃણિપ્રણુન્ન-
ચૈત્યાતિપશ્ચિભજઽત્વરુજૈકબાહુઃ ।
એવં ચતુર્ભુજવિભાવ્યચતુર્થદશાઙ્ગા
ક્ષ્માત્માઙ્ગિની જયતિ મધ્યપદેઽપિતુર્યા ॥ ૧૯॥

સુપ્તિપ્રભૃત્યુદિતચૈત્યવિજૃમ્ભિતસ્ય
જાગ્રત્પદપ્રભૃતિચિદ્ધિનિમજ્જનં યત્ ।
તુર્યં પદં ચ ખલુ તત્ર સુષુપ્તિભાગો
યશ્ચિન્મયઃ શિવવપુસ્તદતીવ તુર્યમ્ ॥ ૨૦॥

તુર્યં દ્વિખણ્ડ મભવસ્ય જઘન્યભાગો
મૂર્ધાઽતિતુર્યમનયોરનુભૂઃ ક્ષમધ્યમ્ ।
જાગ્રચ્છિરાઃસ્વપનસુપ્તિજઘન્યભાગો
મપ્રાણકઃ પશુરસૌ વિપરતિબોધઃ ॥ ૨૧॥

માત્મા પશુઃ પ્રકૃતિરેવ તયા નિગીર્ણો
હાત્માપિ ચિત્પ્રકૃતિરેવ નિવૃત્તિરૂપા ।
ઇત્થં દ્વિધા પ્રકૃતિવિશ્રમભૂઃ ક્ષકારઃ
શમ્ભુઃ પરઃ પરત એવ ભવેત્પ્રકૃત્યાઃ ॥ ૨૨॥

યદ્વા શિવઃ ક્ષ ઇહ મ પ્રતિયોગિભાવાત્
સૌષુપ્તમેવ પરશમ્ભુપદં ચિદાત્મા ।
યચ્ચક્રમધ્યપદતા તદધીશતા ચ
શમ્ભોઃ(સ્તદસ્ય)સદેશ્યગુણગન્ધિતયાર્ચ્યભાવાત્ ॥ ૨૩॥

ચન્દ્રાગ્નિભુક્છશિભુગગ્નિરથઃ સમસ્વં

ભાનુઃ પદે પદ ઇદં ત્રિતયં સ્વરાદૌ ।
ખણ્ડત્રયાત્મકમખણ્ડપદં ચ તદ્વત્
તદ્વિશ્રમઃ પ્રતિદશં સમસઙ્ખ્યતૈષામ્ ॥ ૨૪॥

ભેદાવિભેદસમતાતનુભિઃ સુષુપ્તિ-
સ્વપ્નપ્રજાગરપદૈસ્ત્રિગુણીકૃતાભિઃ ।
પૃથ્વાદિખાન્તતિથિભિર્નનુ શુક્લપક્ષઃ
કૃષ્ણસ્તુજાગરપદાદિકતન્નિવૃત્યા ॥ ૨૫॥

દેહાત્મિકા પ્રકૃતિરેવ પરા વિમર્શઃ
સૈવ પ્રવૃત્તિવિનિવૃત્ત્યુભયાદિભૂતા ।
વાગર્થમિશ્રવપુરિન્દ્વનલાર્યમત્ર-
ય્યેકૈક યુક્ત્રિપુટિકા નવમૂર્તિરેકા ॥ ૨૬॥

ચૈતન્યતા ચ જડતા ચ વિમર્શચિત્યો-
સ્તુલ્યા યદિન્દ્વનલયોરુભયં તદિચ્છા ।
સ્યાત્કર્મ ચાવગલિતં તુ મિથો જડત્વાત્
જ્ઞાનં તયોઃ સમપદં ચ તથા દ્વિરૂપમ્ ॥ ૨૭॥

પક્ષદ્વયેઽપિ પરિવૃત્તિવશાત્ત્રયાણા-
મિચ્છાદિકત્રિતયતાપ્રતિધામ ધામ્નામ્ ।
ષટ્સ્વત્રવૃત્તિષુ ચ કારણકાર્યતાસ્યા-
દ્વિન્દુક્ષયોર્મભબયોઃ પફવર્ગ(ર્ણ)યોશ્ચ ॥ ૨૮॥

ચન્દ્રાગ્નિવિશ્રમણયોઃ સ્વરયાદિધામ્નોઃ
ર્વિશ્વસ્ય બીજદશયોઃ પ્રથમે પદે ચિત્ ।
ચિત્યે નિમજ્જતિ પરત્ર ચિતૌ તુ ચૈત્ય-
મેતત્સમસ્તમુભયોલ્લસિતે તુ ભાનૌ ॥ ૨૯॥

ઇન્દૌ ચ હવ્યભુજિચોદરસીમ્નિ યત્સ્યા-
ચ્ચક્રદ્વયં ચિદચિદભ્યવમર્દરૂપમ્ ।
બિમ્બદ્વયીયુગલમેતદશીતિભાનો-
ર્બિમ્બસ્થલે હિ ચતુરશ્ર(સ્ર)તયા સમસ્તમ્ ॥ ૩૦॥

તસ્માચ્ચતુષ્પદમિદં ચતુરસ્રબિમ્બં
ચિચ્ચૈત્યનિર્જરસરિદ્યમુનાપ્રયાગઃ ।
અર્ચ્યં ભવેત્પ્રથમતોઽથતદઙ્ગભૂત-

ચિચ્ચૈત્યચક્રયજનં ત્વિતિપૂર્વતસ્તત્ ॥ ૩૧॥

અન્તઃસ્થમેવ ચતુરસ્રમુષર્બુધેન્દ્રો-
રર્કાત્મકં ચિદચિદુદ્ભવમેતદઙ્ગમ્ ।
એવં ચ સત્યપિ જડાજડસારમેતત્
પ્રાગેવ પૂજ્યમિતિ પૂર્ણપદે કૃતં તત્ ॥ ૩૨॥

ઇતિ પરમરહસ્યં માતૃકાર્થસ્વરૂપં
સ્ફુટતરમુપદિષ્ટં ચક્રરાજાભિનીતમ્ ।
લગતિ યદયમર્થઃ શક્તિવિદ્ધેઽન્તરઙ્ગે
ન તુ તુનરપરત્ર પ્રત્યવાયો(ઽસ્તિ)ન તન્મે ॥ ૩૩॥

ઇતિ માતૃકાચક્રવિવેકે તુર્યવિવેકઃ પઞ્ચમઃ ખણ્ડઃ ॥ ૫॥

ઇતિ સ્વતન્ત્રાનન્દનાથવિરચિતઃ માતૃકાચક્રવિવેકઃ (મૂલં) સમ્પૂર્ણઃ ॥

Encoded and proofread by Ruma Dewan

*Matrikachakravivekah*

pdf was typeset on January 19, 2026

Please send corrections to *sanskrit@cheerful.com*